कन्याधेयकमेव च। अप्रजायामतीतायां बान्धवास्तद्-वाप्नुयुः” याज्ञ०। “बान्धवा भ्रातरः बन्धुदत्तपदेन कन्या-दशायां यत् पितृभ्यां दत्तं तदुच्यते” दायभागः। तन्मते कन्यादशायां बन्धुभ्यां पितृभ्यां दत्ते २स्त्रीधने च।

**बन्धुर** न० बन्ध–उरच्। १मुकुटे शब्दर० २स्त्रीचिह्ने ३तिल-कल्के ४बन्धुजीववृक्षे ५बधिरे ६हंसे च मेदि० ७विडङ्गे हेमच०। ८ऋषभौषधौ राजनि० ९वके विहङ्गे च पु० शब्दर०। १०रम्ये ११नम्रे १२वेश्यायां स्त्री १३मतुप पु० ब०व मेदि०। १४उन्नतानते च त्रि० अमरः पाठान्तरम्।

**बन्धुल** पु०बन्ध–उलच्। १असतीपुत्रे अमरः २बन्धूके शब्दर० ३सुन्दरे ४रम्ये ५नम्रे च त्रि० अजयपालः।

**बन्धूक** पु०बन्ध–ऊक। (बान्धुली)वृक्षे अमरः“बन्धूकपुष्पसङ्का-शम्” रविप्रणाममन्त्रः। रक्तपीतादिपुष्पे मध्याह्ने प्रकाश-वति पुष्पवृक्षे २पीतशालके मेदि०। “असितपीतलोहितपुष्प विशेषाच्चतुर्विधो बन्धूकः। ज्वरहारी विषहारी यक्षपि-शाचशमनः प्रसादनः सवितुः स्यात्” राजनि०।“बन्धूकः कफकृद्ग्राही रक्तपित्तहरो लघुः” भावप्र०। (वन्दुक) इति ख्याते ३खधूमे न० हेमच०।

**बन्धूर** पु०बन्धू–ऊरच्। १छिद्रे उणा०। २रम्ये ३नम्रे च त्रि० रभसः ४उन्नतानते क्वचिदुन्नते क्वचिन्नते त्रि०अमरः।

**बन्धूलि** पु० बन्ध–ऊलि। बन्धुजीववृक्षे शब्दर०।

**बन्ध्य** त्रि० बन्ध–यत्। कालप्राप्तावपि १ फलशून्ये वृक्षे अमरः। २निष्फले राजनि० “अबन्ध्यकोपस्य निहन्तु-रापदाम्” किरा०। ३बन्धनीये च त्रि०। ४अपुत्रायां स्त्रीजातौ स्त्री शब्दच०। ५बालाख्ये गन्धद्रव्ये स्त्री मेदि०। प्रा०वि० बन्ध्यायाः वृषलीत्वमुक्तं यथा “बन्ध्या च वृषली ज्ञेया वृषली च रजस्वला। अथ वा वृषली ज्ञेया कुमारी या रजस्वला” ६योनिरोगभेदे स्त्री भावप्र०। ४५०७पृ० प्रियज्ञशब्दे परिशिष्टे दृश्यम्।

**बन्ध्यफल** पु०फले बन्ध्यः पूर्वनि०। फलहीने वृक्षे अमरः।

**बन्ध्याकर्कटी** स्त्री बन्ध्याया उपकारिणी पुत्रप्रदत्वात् कर्कटी। तिक्तकर्कट्याम् अस्याः पुत्रदायित्वेन बन्ध्यो-पकारित्वम्। स्वार्थे क अत इत्वम्। बन्ध्याकर्कटिका तत्रैव भावप्र० “बन्ध्याकर्कटिका तिक्ता कटूष्णा च कफा-पहा। स्थावरादिविषघ्नी च रसायनकरी परा” तन्नामसु तत्र पुत्रदेति कीर्त्तनात् तस्य बन्ध्योपकारित्वं बोध्यम्।

**बन्ध्यातनय** पु० बन्ध्यायास्तनय इव। अलीके पदार्थे बन्ध्या-सुतादयोऽप्यत्र।

**बभ्र** गतौ भ्वा०पर०सक०सेट्। बभ्रति अबभ्रीत् बबभ्र।

**बभ्रु** पु० भृ–कु-द्वित्वम् बभ्र–उ वा। १शिवे २विष्णौ ३नकुले ४वह्नौ, ५विशाले देशभेदे ६तद्देशवासिनि ब०व० मेदि०। ७मुनिभेदे च ८पिङ्गलवर्णे पु०। ९तद्वति त्रि० अमरः। स्त्रियाम् ऊङ्। १०खलतौ बभ्रुकरे पुं०हेमच०। ११सिता-वरकशाके राजनि०। गर्गा० अपत्ये यञ्। बाभ्रव्य तन्मु-नेरपत्ये पुंस्त्री०। स्त्रियां ङीप् यलोपः बाभ्रवी।

**बभ्रुधातु** पु० कर्म०। १स्वर्णे २गैरिके च राजनि०।

**बम्ब** गतौ भ्वा०पर०सक०सेट्। बम्बति अबम्बीत् बबम्ब।

**बम्भारि** त्रि० भृ–इन् द्वित्वं अभ्यासे मुम्। सर्वस्य भर्त्तरि “बम्भारिरवसुरर्षि” ताण्ड्यब्रा०।

**बर** न० वृ–अच् १कुङ्कुमे। २आर्द्रके ३त्वचे ४बालके गन्ध-द्रव्ये राजनि०। कर्मणि अप्। ५जामातरि देवादिभ्यः ६आशासे ७षिड्गे जारे च पु०। भावे अप्। ८बरणे ९त्रिफलायां मेदि०। १०गुडूच्यां, ११मेदायां १२ब्राह्म्याम् १३विडङ्गे १४पाठायां १५हरिद्रायाञ्च स्त्री टाप् राजनि०। १६शतावर्य्यां स्त्री मेदि० गौरा० ङीष्।

**बरम्** अव्य०बृ-बा० अमु। ईषदिष्टे अयमन्यस्मादिरित्यर्के।

**बर्जह** न० गवादीनां दुग्धस्रोतउत्पत्तिस्थाने ऋ० १।६२।४ भा०

**बर्ब** गतौ भ्वा०पर०सक०सेट्। बर्बति अबर्बीत् बबर्ब।

**बर्बट** पु०बर्ब–अटन्। १राजमाषे (बरबटी) त्रिका०। गौरा० ङीष्। २तत्रैव व्रीहौ ३वेश्यायाञ्च स्त्री मेदि०।

**बर्बणा** स्त्री बर्ब–ल्यु। नीलमक्षिकायाम् अमरः।

**बर्बुर** न० न० बर्ब–उरच्। उदके निघण्टुः।

**बर्ह** दाने वधे स्तुतौ वाचि च भ्वा०आ०सक०सेट्। बर्हते अबर्हिष्ट “विगर्हितं धर्मधनैर्निबर्हणम्” नैष०।

**बर्ह** न० बर्ह–अच्। १मयूरपिच्छे अमरः। २पत्रे ३परीवारे हेमच० मयूरपिच्छे पुंस्त्वमपि। “कं हरेदेष बर्हः” इति विक्रमो० प्रयोगात् “यथा बर्हाणि चित्राणि बिभर्त्ति भुजगाशनः” क्लीवे प्रयोगः। [पु०९४अ०

**बर्हकेतु** पु०बर्हं केतुचिह्नं यस्य। नवममनोः पुत्रभेदे मार्क०

**बर्हवत्** पु० बर्ह+अस्त्यर्थे मतुप मस्य वः। मयूरपिच्छयुक्ते ततः विमुक्तादि० अण्। बार्हवत तत्सम्बन्धिनि त्रि०।

**बर्हस्** न० बर्ह-स्तुतौ असुन्। आस्तरणे ऋ० १।११४।१०।

**बर्हि** न० बर्ह–इन्। कुशे।

**बर्हिण** पु० बर्ह+इन। मयूरे अमरः।

**बर्हिन्** पु० बर्ह+अस्त्यर्थे इनि। मयूरे अमरः।

**बर्हिवाहन** पु० बर्ही मयूरो वाहनमस्य। कार्त्तिकेये।